BYJU'S The Learning App

# ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

# KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD

Malleshwaram, Bengaluru – 560003.

## ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ – 2021-22

## MODEL QUESTION PAPER - 2021-22

**ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 67-S**

**Subject : THIRD LANGUAGE SANSKRIT** | **Subject Code : 67-S**

**ಅವಧಿ : 3 ಗಂಟೆ** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 80**

**Time : 3 hrs.** | **Max. Marks : 80**

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**

**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे अष्ठत्रिंशत् (38) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठनां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति।

**अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत।** 8 x 1 = 8

1. **'महाबलः' अस्य समानार्थकं पदम् इदम् भवति ।**
   A. गणेशः
   B. इन्द्रः
   C. शिवः
   D. चन्द्रः

2. **'उपकारः' अस्य विरुद्धार्थकं पदम् इदं भवति ।**
   A. परोपकारः
   B. अपकारः
   C. प्रत्युपकारः
   D. ममकारः

3. **'भारतस्य' अत्र एषा विभक्तिः भवति ।**
   A. प्रथमाविभक्तिः
   B. तृतीयाविभक्तिः
   C. पञ्चमीविभक्तिः
   D. षष्ठीविभक्तिः

4. **'कुरुक्षेत्रस्य' अत्र इदम् वचनं वर्तते ।**
   A. अन्यवचनम्
   B. द्विवचनम्
   C. एकवचनम्
   D. बहुवचनम्

5. **'प्रेषयति' अत्र एषः लकारः भवति ।**
   A. लट्लकारः
   B. लृट्लकारः
   C. लङ्लकारः
   D. लोट्लकारः

6. **'गच्छामि' अत्र एषः पुरुषः भवति ।**

A. प्रथमपुरुषः

B. मध्यमपुरुषः

C. उत्तमपुरुषः

D. अन्यपुरुषः

7. **'भगवती विराजमाना अस्ति' अत्र रेखाङ्कितपदे एषः प्रत्ययः भवति ।**

A. क्तप्रत्ययः

B. शानच्प्रत्ययः

C. तुमुन्प्रत्ययः

D. ल्यप्प्रत्ययः

8. **अत्र शतृप्रत्ययान्तं पदम् इदं भवति ।**

A. पठन्

B. रक्षितवान्

C. प्रणम्य

D. लिखित्वा

**II. चतुर्थ पदं लिखत।** **4 x 1 = 4**

9. मधुसूदनः – श्रीकृष्णः :: पवनपुत्रः .........................

10. पुण्यपीयूषपूर्णाः – सन्तः :: सदयम् : ............................

11. इन्द्रः – शक्रः :: अङ्गराजः ...............................

12. अर्जुनः – पार्थः :: ज्ञानी : ................................

**III. एकवाक्येन उत्तरं लिखत।** **4 x 1 = 4**

13. कर्णार्जुनयोः कीदृशं युद्धं प्रवृत्तम्?

14. कालपर्ययात् का क्षयं गच्छति?

https://byjus.com

15. भारतीयान् अस्मान् का बध्नाति?

16. कर्णस्य सारथिः कः?

**IV. दित्रैः वाक्यैः उत्तरं लिखत।** **4 x 2 = 8**

17. विश्वसंस्कृतपुस्तकमेलायां के के अंशाः आसन्?

18. एकाग्रतायाः विषये विवेकानन्दः किम् अवदत्?

19. कति विधाः जनाः देवं भजन्ते? ते च के?

20. गणेशः कीदृशः?

**अथवा**

शारदा कीदृशी?

**V. संस्कृतभाषया अनुवादं करुत।** **1 x 2 = 2**

21. ನಗರದಲ್ಲಿ ಸುಂದರವಾದ ಉದ್ಯಾನವಿದೆ. ಆ ಉದ್ಯಾನದಲ್ಲಿ ವಿಶಾಲವಾದ ಸರೋವರವಿದೆ.

**VI. कर्नाटक भाषया आङ्ग्लभाषया वा अनुवादं कुरुत।** **1 x 2 = 2**

22. गोदावरीनदीतीरे विशालः शाल्मलीतरुः अस्ति। तत्र अनेके पक्षिणः निवसन्ति।

**VII. 23. विग्रहवाक्यं लिखत।** **1 x 2 = 2**

(a) शूलपाणिः।

(b) राघवेन्द्रः।

**अथवा**

**समस्तपदं लिखत।**

(a) वृक्षस्य समीपम् = ............................

(b) चन्द्रः शेखरे यस्य सः = .......................

**VIII. लक्षणं विलिख्य अलङ्कारस्य नाम लिखत।** **1 x 2 = 2**

24. पदारविन्दम्।

BYJU'S The Learning App

**यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत।** **2 x 3 = 6**

25. "गच्छ अद्य अहं पुस्तकं न दास्यामि"।
    कः पाठः ? कः अवदत् ? कम् अवदत् ?

26. "भवतः का गतिः भवेत्"।
    कः पाठः ? कः अवदत् ? कम् अवदत् ?

**X. 27. सन्धिं विभज्य नाम लिखत।** **1 x 3 = 3**

(a) हरिरेव।

(b) तथैव।

(c) बालस्तत्र।

**XI. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दो नाम लिखत।** **1 x 3 = 3**

28. लघ्वी पुरा वृद्धिमती च पश्चात्।

**XII. कवेः देश–काल–कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **1 x 3 = 3**

29. भासः।

**अथवा**

डा।। बा. श्री रामकृष्णराव्।

**XIII. पद्यपाठस्य नाम विलिख्य, तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत।** **3 x 3 = 9**

30. न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
    तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति।

31. हिमालयो नः पूज्यः शैलः
    पूज्यनदी सा गङ्गाम्बा।
    साहित्यं नः सङ्गीतमपि
    भाषा भेदेऽप्येकमिह।।

32. शीलं शौर्यमनालस्यं पाण्डित्यं मित्रसङ्ग्रहः।
    अचोरहरणीयानि पञ्चैतान्यक्षयो निधिः।।

BYJU'S The Learning App

**.पद्यपाठस्य नाम विलिख्य पद्यं पूरयत।** **1 x 3 = 3**

33. गुरवे ................................................................... ।

...................................................................नमः ।।

**XV. दशवाक्यैः उत्तरं कर्नाटकभाषया आङ्ग्लभाषया, संस्कृतभाषया वा लिखत।** **2 x 4 = 8**

34. विश्वसंस्कृतपुस्तकमेलायाः वैभवं वर्णयत।

35. 'उभयभारती' इति कथाभागं सङ्गृह्य लिखत।

**अथवा**

'विक्रमः वेतालश्च' इति कथाभागं सङ्गृह्य लिखत।

**XVI.अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नात् उत्तरत।** **1 x 4 = 4**

36. हंसस्य वर्णः शुभ्रः। काकस्य वर्णः कृष्णः। एकदा कश्चित् काकः तडागस्य तीरं गच्छति। सः तत्र हंसं पश्यति। सः वदति – "अहो! हंसः कीदृशः शुभ्रः अस्ति। अहम् अपि शुभ्रः भवामि।" अनन्तरं सः काकः जलाशयस्य जलेन निजं शरीरं प्रक्षालयति। तदा काकः पाषाणस्य खण्डेन स्वशरीरं घर्षति। वारं-वारं घर्षति सः तथापि कृष्णः वर्णः शुभ्रः न भवति। घर्षणेन काकस्य शरीरे तीव्रा वेदना भवति। अन्ते काकः पञ्चत्वं गच्छति। अहो! काकस्य मूर्खता।

**प्रश्नाः**

i) हंसस्य वर्णः कः?

ii) काकस्य वर्णः कः?

iii) कस्य शरीरे तीव्रा वेदना भवति?

iv) काकः केन स्वशरीरं घर्षति?

BYJU'S The Learning App

**I. 37. दशवाक्यैः प्रबन्धं लिखत।** **1 x 4 = 4**

i) परिसरमालिन्यम्।

**अथवा**

ii) दूरदर्शनम्।

**XVIII. पत्रं लिखत।** **1 x 5 = 5**

38. तुमकूरुमण्डलस्य सर्वकारीयविद्यालयस्य छात्रः/छात्रा इति मत्वा अग्रजस्य विवाहार्थं दिनत्रयस्य विरामं सम्प्राथ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत।

**अथवा**

शैक्षणिकप्रवासार्थं धनं प्रेषयितुं सम्प्राथ्य पितरं प्रति पत्रं लिखत।